इति। साधुशब्दे इति स्फुटप्रदेशम संक्रीत्यादौ· अंतर्गताः विसर्गादिवादयः। बोधकाः वाचकाः बोध
कत्वेमवशक्तिरित्यर्थस्याद्विवेचितत्वात्। न तु ते तत्स्मृताः स्थादयो। लोदयप्रभृत्यर्थः अपुत्समानपदसमभि
व्याहारानंतर्गता वर्णा वाचका न वादयस्ते वा त्रिविधमिति पुत्रिसर्धारामि इति भावः। अत्र विधिकौ
टिः परेषां निषेधकोटिरस्माकं। ईशा अत्र दर्शितानामन्यगामिनि वेशितः। प्रयोगसमवायित्वं स्था
वादयो न वाचकाः तेषां बहुत्वादनंतेषां शक्तिकल्पनापत्तेः शक्तानां वेछेदकत्वकल्पनापत्तेश्च स्था। राम०
२१०

द्दिति गौरवं च। किं तु तैः स्मृता ह्यादेशिनो लकारा वाचकाः। लत्वस्फुरत्तानिरूपितया तस्मा एव शक्ते
तावच्छेदकत्वात्। अन्यथाभिचारात्। न चैवं भ्रान्तज्ञानतोऽपि बोधः स्यादिति वाच्यं। तादृशबोधे
भवतीति समभिव्याहारस्य कारणत्वात्। अन्यथा भ्रान्तिवेलातोऽपि बोधापत्तेः। न चैवमपि तानज्ञा
नां बोधो न स्यादिति वाच्यं। तेषां शक्तिः एवं शक्तिभ्रमाद्बोधात्। अपभ्रंशाद्बोधस्थले कल्पनात्। अथै
वं शास्त्रादिस्थले कर्तृकर्मणो वाच्यत्वं न स्यात्। स्यादेव कृतिमात्रं तथा। वाचकस्य स्थानिनो लका
रस्य तिङादाविव तत्त्वादिति चेन्न। लकारस्य कृतिमात्रमर्थः। कर्त्रं च न शानजाद्यर्थः। कर्त्र
ति स्यादिति तु शानजन्तात्। तथा च नोक्तदोषः। नामार्थयोरभेदान्वयो धातुत्वात्तत्र कर्त्रेवार्थः॥
तस्मात्स्वरूपमास्तां वाचकत्वे चिवर्णस्फोटे पुत्रादिवदिति। नान्वाक्यव्यवस्थापपत्तिमाच
ष्टे। व्यवस्थितेर्भवत्तृते सहेतुना यतस्तथा। किं चोर्व्यात्ते न शत्रादेर्लिङ्गवस्थायते य दिशि दृश। कथं के
न्तु स्वाच्यत्वं वाच्यत्वेन द्दिगावयास्मृतानां वाचकत्वे व्यवस्थात्तथा हि राम इत्यत्र विसर्गो

वै. भू. गाः किंभिः स्मर्तव्यः। किं स्तुः। किं चाहुः। कालापिनाभिः। आस्माकीनैः स्तुः। अपरैस्तु तः। तथा च ये
२११ नेदानीमर्वमधीनं तस्य विनिगमनाविरहात् प्रतिबंधः स्यादिति संप्रदायविदः। तस्वितं तेषां लि
पिवदनतुगमेपि कृतभावात्। अत एव ययरेप्रदात्क्लेशपराहता बोधेनकश्चिद्विशेषः। अत एव रा
मादिस्थले तिवादिस्मरणाद्धा लकारस्मरणात्। लडाद्येमात्रादित्वस्य तिपरास्ता। अप्र
योजकत्वादिति। तस्मात् कृत्स्नकारस्य वाचकत्वे लकारमविदुषां बोधानस्पात्। वाचकाज्ञाना
त् न च तिङ्ष्वेवशक्तिभ्रमात्ततो बोधः। तस्य भ्रमत्वे मानाभावात् बहूनामानुपूर्व्याः शक्ततावच्छे
दकत्वादिकल्पनापत्तिर्मीनमिति चेत्। न वापि पूर्वोक्तक्रमेणादेशिनो नानात्वेन गौरवस्य
तुल्यत्वात्। पदतदर्थघटितशक्तेर्नेमस्य ब्रह्मणाप्युपपादयितुमशक्यत्वाच्च तद्व्यवस्था। यद्वा
रामदत्तादौ चादेशिनां नानात्वात्। शक्तः कोवातेति निपामकाभाव एवाव्यवस्था। आदेशानां रा. भू.
तु नियतत्वात् नापदेश इति स्तु धियाय्यथा। साधकान्तरमाह। व्यवहृतेरिति। व्यवहारस्ताव २११

ष्ठुक्तिग्राहकशिरोमणित्वेन सर्वैर्मन्यते। स च पूर्व्वमाणानि रूढिष्वेवेति तत एव शक्तिग्राहया
चोगोत्त्वप्रामाणिकमिति भावः। किं च नन्वेवं तु नायमिति त्र्ययं भावः लकारस्य बोधकत्वे सत्यलड्
न तेऽपि बोधः स्यात् तादृशबोधं प्रति नियमाभिव्याहारोऽपि कारणमिति चेत्। अस्तु त
द्विषयकं त्वात्समभिव्याहारस्य वाचकत्वशक्तिः। न चापि तादृशबलीस समभिव्याहारो वा सम
भिव्याहृतावर्णा वा वाचकाः इत्यत्र विनिगमनाभावात्स्यन्नेकार्थन्ति न। समुदायस्य शक्तिश्चायं स
मभिव्याहृतावर्णा एव वाचकाः। न च प्रतिवर्त्तेनेकार्थानित्वे प्रतिवन्नसंभवः। तत्राः
पित्वेकं समवायेन वृत्तित्वस्वीकारादिति। के चित्तु आदेशेनादेशेनादेशीस्मार्यतेतेना
र्थबोधस्तदिति मते पेस्मन्मतेनेवोचकाः तावच्छेदकास्तेतन्मते स्मारकतावच्छेदकाबाध्यास्तथा
च नन्वेदं तोरिति न्यायेन तत एव वाचकतावच्छेदकाइति भावः। न च येन केनापि रूपेण स्मा
रकत्वमिति शंकां अतिप्रसंगावित्याहुः। अत एवोक्तं लाघवादेकारोवाचकइतिनि।

वै॰ भू॰ रलालकारस्योभयत्रापि साम्यात् ॥ क्तत्तिङः ॥ कर्तृभावनावाचकत्वनियमो भवत्विद्ध एव न स्या
२१२ दित्याह ॥ किंचेति ॥ आदेशानां वाचकत्वे तु तेषां नानात्वादुपपद्यते पंविभाग इति भावः ॥ यत्तु शाना
ज्ञोक्षिभिर्भिन्नयोराशक्ताकर्त्तोपस्थाप्यत इति ॥ तच्चिंत्यं तेषां कर्तृभिन्नशक्तेरसिद्धेः ॥ कर्त्रिक्तादि
-212 तिचेनाचपर्तेत इति विवेचितं द्वितीयकारिकायां ॥ ६ ॥ ननु भावार्थयोर्भेदे नान्वयायोगात्पचैत्रः
पचमान इत्यादावन्वयवारणाय कर्तृवाच्यस्येत्यत आह ॥ तरवाद्यंतत्तिङ् त्वासितता
मताक्तृत्विवस्फुटानामार्थयोरभेदोपि तस्मात्तुल्यो विधार्यतां ॥ ६ ॥ अथादेशावाचकोस्त्वदस्मो
टस्यान्न स्फुटः ॥ पचतिरतरी मैत्रः पचतिकल्पं मैत्र इत्यादि यत्र ॥ तत्र भैत्रे ॥ अत्रातिशय्यया कानुकू
लभावनायाः ॥ ईषद् समाप्तभाप्तया कानुकूलभावनायोऽश्वस्य मैत्रस्याभेदात्संभवात्तद्वर्थं
कर्तृवाच्यास्तितृपमपिस्यात्तानामार्थत्वस्याविशेषादित्यर्थः ॥ अथ तु नरवंतं नामननरवेवेति चेत्तर्हि पच राम॰
मानइत्यत्र शानजंतं नामनशानच् मात्रमिति कल्पमिमाहो कर्तृरिलङ् ॥ पचमानइत्य २१२

चाप्यापत्तेः॥ न च शानच्प्रत्ययस्यान्यत्र शक्तिनिर्णयः। भावनायामेवाख्यातवत्कृदुपचमा
न इति वाच्यं॥ शानच्स्थले लट्त्वेनात्मनेपदत्वेन चादिवद्वाचकत्वेन लकारस्यैवाभ्युपगन्तुमुचितत्वा
दिति तस्मात्समभिव्याहृतवर्णानामेवोक्तलाघवादन्यथाबाधकाद्वा वाचकत्वमिति सिद्धं॥ न च स्थल
ः कर्मणि लिने तलकारस्यैव वाच्यत्वकथनात्तिङो वाचकत्वं स केनापि बोधनाद्वा लकार एव वाचको न
तिङ्॥ तिङः लादेशत्वेनैव वाचकत्वोपपत्तेः कल्पसंप्रत्याकृष्टुताद्विनत्वाद्वत्वेकोऽस· सो बोधकत्वरूपायाः
शक्तेर्धर्मतनतिङां लादेशत्वेनैव वाचकत्वोपपत्तिकल्पनिष्ठाया एवानुशासनलाघवादपकल्प्य
ते लकारे कल्पितत्वान्तेरायेवक्षाचीनस्मृतादन्तमप्यविरुद्धमिति दिक्॥ इति वर्ण
स्फोटनिरूपणं॥ एवं सिद्धे समभिव्याहृतवर्णसवाचकत्वे पदस्फोटोपि सिद्ध एकस्माह्याश्रये
ति च्याद्देशाः॥ जिपूर्विस्मिन्निग्रस्तादयः पदस्फोटः पदं वाचकमिति स्थितः॥ अर्थमाभिज्ञायः॥ अर्थबोधा
नुकूलशक्तिर्वर्णसमूहरूपं एव नत्वतो कं नयामति धनं वनमित्यादौ न लोपापत्ते

ःप्रत्येकं वर्णानामर्थवत्त्वेन प्रातिपदिकत्वे सिद्धे नलोपः प्रातिपदिकान्तस्येत्यस्य दन्तपदत्वापत्त्या प्रत्येकं सु
बुत्पत्तौ च वर्णापत्तिः । किं च प्रत्येकं शक्तिमत्त्वे प्रत्येकं वर्णात् स्वार्थबोधापत्तिः । सर्वेषां वाचकशक्तिमत्त्वात् घटकत्वश
पदाभ्यामिव । तथा च द्वितीयादिवर्णोच्चारणानर्थक्यमपि स्यात् । अथ प्रत्येकं वर्णैरर्थस्मरणं जन्यते चरमेण पुनः स्मृत
जन्यत इति वाच्यं न च प्रत्येकं वैजात्ये संभवति न स्मरणमिति वाच्यं बाधकाभावेन तत्रापि प्रवृत्त्युपगमात् अत एव नि
र्विकल्पकं स्मरणमेव निरि इति चेन्न । प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात् मानाभावाद्गौरवाच्च । तस्मात्स्वकृ
त्तिप्रत्ययादौ तत्तत्समुदायशक्तिर्व्यासज्यवृत्तिर्न तु प्रत्येकवर्णपर्याप्तेति एतदेवोद्देशानामवाचकत्वेन सिद्धान्तीयुक्तम
थेतीति दिक् । १५ । ननु शिङ्तं पदमिति स्वशास्त्रपरिभाषितपदस्यापि वाचकत्वमिति स्वीकारे हरिणामतमाह । घटेनेत्या
दिषु न हि प्रकृत्यादिभिदा स्फुटा । वर्णसादावेवेहापि संभ्रमो हि हरिरूपते ः । प्रकृत्यादिभिदा प्रकृतिप्रत्ययभेदो
नेत्यत्र घटादिति प्रकृतिः एनेति प्रत्यय इति वा घटे इति प्रकृतिर्नेति च प्रत्यय इति वेत्यत्र विनिगमकाभाव इति । न च एम०
त्रटाङ् सिङ् सांनात्स्यादेत्यवभाष्ये कल्पितत्वात् घटेनेत्यादौ नेत्येव प्रत्यय इत्यस्य स्तुवचत्वात्तेनोक्तानुपपत्तिः । २१२

वैयाकरणाः सुखेन नाहं शक्यतावच्छेदकापत्ते नाहावत्त्वसाध्यादिविशिष्टवचनस्यैव लक्षणावित्यतः समुदायसंकेतद्वयात्र
तदैवमाभाषेन्नातु शक्यद्वयस्य पक्षवन्नतो वैयाकरणानां प्रसेकं तदिदानीमपि समुदायेषु न्यायानां बोधस्थानां तेष
दैवन्यायत्वमनुपपत्तिमात्र इव स्यात्. न चैतेषां शक्तिभ्रमसंभवः कार्यसंकेताभावे इति तन्मितायां शपेनाहुः इवेन्यादिः
॥६५॥ एवं रीत्या वाक्यस्फोटमप्याहुः । इदं वेत्यादि इच्छा चेद्वाक्यस्फोटं विनिश्चिनु. वाच्यार्थं विशिष्य समवेदना
ग्रहणं च लक्षणेदं लक्षणाप्रयुक्तावच्छेदकपक्षान्तरे च्छायाद्वयाद्विशेषावेत्याद्युदाहरणे आच पदयोः
समूहज्ञानेऽपि समुदायपदस्य तात्पर्यवशादवशिष्टके वसन्तु दायपशक्तिरितिभावः ॥ ननु वाक्यस्फो
टकृत्किं ग्रहणसंभवः कथं कार्थस्य पदैर्वादित्याशंक्य समाधत्ते आर्थ इति पद इति द्वेवा कार्यार्थे धातु
कोणाद्वितीयेति पक्षेऽपि समभ्येत इत्यर्थः ॥ आयमाशयः पदानामेव वाक्यार्थे लक्षणाः पदार्थान्वितेशक्तिस्तेषाम
पि प्राकृतत्वं तु पस्थिते शब्दिनि ग्रहासंभवात् कथं निस्तारः ॥ आर्थपदैः पदार्थीनामनुपस्थितानां वाक्यां
शानानेसाचिंत्या तेनैव वाक्यार्थोपस्थितानां विनानुपस्थितत्यागान्न समवायः शाब्द इति मध्ये

वै. मं. लक्षणायद्दः शाणविज्ञानहरिद्रानामकनविशेषणाहरिद्रायांनद्यांयोगइतिश्रुतेवाकेनदी
२१५ पदस्यमभिधाहोरेणातदानीमेवहरिद्राशब्दस्यनदीविशेषशक्तिग्रहणोननदीलिंगात्तस्य
215 बाधितेनावगततीरस्वत्पवत्. इतिपरिमलोक्तरीत्यावाच्यं ।। संमतेर्ह्यस्माकमपीतिधारि
वान्वितेशक्तिः। परंत्वन्वयांशेमेवाज्ञाता. पदशक्तिस्तुज्ञातेवर्थांशेचैवज्ञातोपयुज्यतइतिकुत्र
शक्तिवादइत्यस्युपगमस्तर्ह्यस्माकमपिवाक्यशक्तिरज्ञाता. पदशक्तिः. स्तुज्ञातेवतथेति. ।नन्वाकां
क्षादिसहकारेणाज्ञातवृद्धेरेवशाब्दत्वान्नदृतिरिक्तशाब्दाभावाद्दाघः। पक्षोनयुक्तः. आकां।
क्षादिजन्यातिरिक्तशाब्दबोधेपमाणाभावात्. किंचैवमनधिगतार्थांतत्तावेदस्यमीमांसा
द्वयसिद्धोस्थितेत्. अथपार्थमिकबोधस्यत्रिजन्यत्वाभावाक्षावृत्त्वंनसंभवातीतितज्ज्ञा।
नियुकारकोनुभवादेवबोधांतरकल्प्यते. पदजन्यपदार्थोपस्थित्याकांक्षाघसहकृतश्मा। राम०
णाबोधत्वयाधिगतार्थांतत्वमितिचेत्पादेवंपदादिबोधद्वयमनुभवसिद्धंस्यात्. अन्य २१५

थानुपपत्तेरभावाच्च। किंच वृत्तिजन्यत्वानुरोधेन बोधांतरकल्पनेन्वितशक्तिरेव सिध्येत्। लक्षणा
ज्ञानकार्यकारणभावांतरस्य आकांक्षादिजन्योपस्थित्यंतरस्य वा कल्पने न लाघवात्। एवमज्ञाततया
वृत्तेरनुपयोगात्। द्वितीयः प्रकारः स्वधुरीणाशयेन प्रकारांतरमाह। लक्षणादिति। लक्ष्यतेनेनेत्य
नेनेति लक्षणं मनः। तस्मात्। अयमाशयः। वृद्धव्यवहारात् प्राथमिकशक्तिनिर्णयोपस्थापनत्
मा। तथा चापि पदैः पदार्थोपस्थितौ सत्यां मनस्तमात्तदुपस्थितिर्नोपपन्ना। परंतु। मानसं ज्ञानं
संशयरूपं प्रायो दुर्वारमिति शाब्दः। शक्तिग्रहेतु लिंगादेर्निर्णायकस्य सत्त्वान्न संशय इति।
वस्तुतस्तात्पर्यज्ञानरूपमेवोपस्थितिमादायोन्वयांशशक्तिग्रहस्तात्कालिक एव। अतए
वाकांक्षादिसहकृतमनसः संशयाजनकत्वेपि न दोष इति ध्येयम्॥२२॥ इयमेव मीमांसकानां
तदनुयायिनां च गतिरित्याह। सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति ये विदुः। भाट्टास्तेपीत्यमानु
र्लक्षणायाग्रहे गतिः॥ स्पष्टमेतत्॥२३॥ अथ गामानयेत्यादौ पदैः पदार्थानामुपस्थितौ वाक्या

वै. भू. घटितानन्तसंभवान्नास्त्यशक्तिः। न चात्र पङ्कजानेपि समुदायशक्त्या बोधोनुभविकानां। पङ्कजवाक्यमा-
२१५ स्त्वेवमेव। नेपदं समुदायशक्तिनार्थदोष इति। तन्न। अवयवैरुपपन्नत्वात्। तस्माज्ज्ञातमर्यादा। अन-
न्वयेनैव समुदायशक्तिरिति मन्तव्यास्त्वेषु वेल्लि तल्लक्षसर्वैर्वैपदैः पदार्था उच्यन्ते। वाक्येन वाक्यार्थ इ-
215 ति सिद्धान्तमर्यादा। अत एव समासप्रकरणे वाक्येति व्याप्तिवारणायेति यथा। स गच्छतेनयाच पदैः पदार्थो-
नामुपस्थितानां वाक्यार्थविनावृत्तिनशाब्दबोधविषयत्वसंभवइति समुदायशक्तिराद्रियते। नन्वाकां-
क्षादिसहकारेण पदानामेव वाक्यार्थबोधकत्वं भविष्यतीति चेन्न। गुरुपमूता कांक्षायोग्यतादिज्ञा-
नकारणत्वे मानाभावात्। नन्वेवं घटः कर्मत्वमित्यत्रापि बोधापत्तिः। अयमेति पुत्रो राज्ञः पुरुषोपसार्य-
तामिति राजपदस्य पुरुषेणासंमन्वयानुभवे आकांक्षायां युक्तेनान्वयापत्तिश्चेति चेन्न। घटः कर्मत्व-
मित्यादौ शक्तिग्रहसत्वे इष्ट एव बोधः। स एव विपरीतमनुमन्तः। अन्यस्य तदभावादेवनेति संभवात्। अयमे- रामः
यपातीत्यादौ तात्पर्यज्ञानाभावान्नबोधः। तस्य तत्वाप्यावश्यकत्वात्। तद्घटितोयाच्याकांक्षायादुर्वच २१५

त्वात्· अयं घटमानयेत्यादौ घटपदाम्पदयोः प्रत्येकं गृहीतशक्तिकस्य तादृशानुपूर्वीज्ञानतात्पर्य
ज्ञानादिमतस्तु घटकर्मकानयनमिति बोधाभावात्तादृशबोधे घटपदोत्तरं द्वितीयायाः ततो धातोस्तत
आख्यातस्येत्यादिसमभिव्याहारः कारणमित्यादिकार्यकारणभावग्रहवतस्तु बोधे घटपदोत्तरं द्विती
याः ततो धातोस्तत आख्यातस्येत्यादिसमभिव्याहारः कारणमित्यादिकार्यकारणभावग्रहवतस्तु बो
धात्तादृशबोधे तादृशकार्यकारणभावग्रहसमस्य हेतुत्वावश्यकत्वात्सैवाकांक्षा· एवं चायमेतीत्यादिवा
रणाय तात्पर्यज्ञानमपि हेतुरिति चेन्न यापिमिद्धावास्मोपः न्यदृज्ञानकार्यकारणभावरूपपदशक्ति
ज्ञानस्य वतत्समुदायरूपवाक्यज्ञानकार्यकारणभावरूपवाक्यशक्तिज्ञानस्यापि शाब्दहेतुतायास्त्वयाभ्यु
पगमात्· एवं चेवाक्यशक्तिरेवाकांक्षेति परपरिभाषामात्रमवशिष्यते तदूपितस्याकांक्षात्वेन विरुद्धं· एवं चेतद
नुरोधेनान्वयांशस्य शाक्यत्वनिरसनमयुक्तं न चैवं समासग्रहणानियमार्थमित्यसंगतं स्यात्· गामानये
त्यादिस्थले त्वयाप्याकांक्षानभ्युपगमात्· सुबन्ततिङ्· तयोस्तु परस्परान्वयितत्वेनैव वारणादिति वाच्यं। · द्वितीयादे

वै॰ भू॰ र्थस्तु विशिष्टस्यैवातिपदिकत्वापत्तेः तयोरुक्तरीत्या शक्तिमत्त्वात्. न च धातोः प्रत्ययांतत्वादप्रत्यय इति
२१६ पर्युदासापत्तिः प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्य ग्रहणमिति परिभाषया दोषविरहात्. । अ
216 थवा गामानयेतिवाक्ये एका समुदायशक्तिरस्तु. तथाप्युक्तदोषस्याभावेनापि. न च तदज्ञानेपि प्रागु
क्तशक्तिज्ञानादेव बोधात्तस्य व्यभिचारः धातु. विशिष्टशक्तिग्राहके प्राग्नदादिवत्कारकविभक्तिविशि
ष्टपदधातुघटकयोर्विशिष्टयोस्तत्कारकविशिष्टक्रियाबोधकत्वमिति सामान्यतः शक्तिग्रहानंतरं
पदविशेषसमभिव्याहारे सति तात्पर्यवशात्तदर्थविशेषविशिष्टक्रियाविशेषबोध इत्यभ्युपगमात्. त
थापि सामान्यतः कार्यकारणभावस्वीकारे तत्कार्यकारणभावग्राहकस्यैव समुदायशक्तिग्राहकत्वम
तिस्वीकारे तेनैव व्यभिचाराभावात् ज्ञानं चैवमपि तत्समभिव्याहारानंतरमावश्यकं तथानंतरं. तथापि तु स्यत्वात्तयोर्द
घप्रकारकशाब्दबोधमात्रे घटार्थकपदोत्तरविभक्त्यादिजन्योपस्थितिर्हेतुः । एवं विशिष्यतासंबंधेन क
र्मत्वप्रकारकशाब्दबोधे कर्मत्वार्थकपदप्राग्वर्त्तिपदजन्योपस्थितिर्हेतुरित्यादिसामान्यत एव सर्वत्र २१६

कार्यकारणभावद्वयम्पेयतेतदान्नपसेतत्रतत्रवाक्येऽनंतन्क्तिकल्पनेगौरवमतिरिक्तत इति चेत् अस्मा
कमपिघटमानयेत्यादिवाक्येष्वर्वत्रैकाशक्तिर्वीकाथीविषयिरापस्तु निरूपितस्यादेः कर्मत्वादीनां संबंध
सेकत्वात् घटमानयेत्यादौ पटकर्मकबोधाभाव पटस्यापदादनुपस्थितत्वादुपपद्यते। अस्तु नाव देवं त
थापि वाक्यनिष्ठबोधकताया शक्तित्वे किंमानमिति चेत् उच्यते विषयतासंबंधेन शाब्दबुद्धित्वाव
छिन्नंप्रति तेनैव संबंधेन वृत्तिजन्योपस्थितेर्हेतुत्वे वमाने अन्यथा घटमानयेत्यत्र घटपटशक्तपज्ञानव
तोपितज्ज्ञानवत इव बोधापत्त्या घटशाब्दबोधे घटार्थकपदवृत्तिजन्यज्ञानत्वेन कारणतावाच्येत्यर्थभेदे
नानेककोटिकार्यकारणभावकल्पनापत्त्यावतिगौरवं स्यात्। अस्मद्रीत्या घटविषयतया वृत्तिज
न्योपस्थितिरूपकारणाभावान्न शाब्दबोध इति वरमेककार्यकारणभावकल्पने। ननु घटत्ववि
शिष्टघटप्रकारकशाब्दबोधे वृत्तिजन्यघटत्वविशिष्टज्ञानत्वेन हेतुतायां घटमानयेत्यत्र घट
त्वयोर्विशेषणविशेष्यभावव्यत्यासेन बुद्धस्थले कोऽप्यवारणाय वाच्यत यात तएव नोक्तातिप्रसंगः

वै.भू.
२१७
217

नि च न्यायनये घटमानयेति वाक्यसममिव्याहृतताविभक्तिकघटपदस्यैव बोधकारणावश्यकत्वेन घट
त्वविशिष्टघटप्रकारकशाब्दबोधत्वावच्छिन्ने घटार्थकपदोत्तरसार्थकविभक्तिनिपातादिजन्योपस्थिते
हेतुतानुरूपाकांक्षा कार्यकारणभावेनैवानतिप्रसंग इति वाच्यं । घटार्थकत्वं हि घटबोधफलोपहितत्वं । अ
न्यथा लाक्षणिकघटपदाद्बोधापत्तेः । तथा च वृत्त्या तद्बोधकपदज्ञानत्वेन कारणत्वेनैवानतिप्रसंगात् तथा च वृ
त्तिज्ञानस्य हेतुत्वे मानाभावादिति चेन्न । अनंतकार्यकारणभाववृत्तिप्रवेशे गौरवमपेक्ष्याकांक्षायाः पदजन्यज्ञान
त्वेनैव प्रवेशस्यौचित्यात् । तथा च घटपदादाकाशस्य समवायेन देवदत्तयज्ञदत्तादेश्च जनकत्वेनोपस्थितस्य
शाब्दबोधविषयतापत्तेः कारणीयविषयतया शाब्दबोधत्वावच्छिन्ने वृत्तिजन्योपस्थितेस्तथा हेतुत्वमावश्यकं । अ
स्माकं पदैः पदार्थानां वाक्यार्थस्य वा बोधाभ्युपगमाद्विशेषणविशेष्यभावव्यत्यासासंभवाच्च । यथोपस्थिता
नामेव वाक्यशक्त्या संसर्गबोधात् । यत्तु घटशक्तं पदं घटान्वयबोधं जनयतीत्येव तिपमस्वीकारान्नानुपपत्ति
रिति तन्न । एवमपि वृत्तिज्ञानकार्यकारणभावानुरोधेन शक्तिकल्पनावश्यकत्वात् । उक्तरीत्यैवोपपत्तौ घटा २१७

न्वयबोधं प्रति घटशक्यपदज्ञानत्वेन हेतुत्वे तत्तनेककार्यकारणभावांतरकल्पने गौरवाद्वं·नैवमपि पदार्थ
शाब्दत्वमेव वृत्तिज्ञानकार्यतावच्छेदकं वाच्यमिति वाच्यं संसर्गस्यापि वाक्यार्थसंसर्गादिदार्थत्वात्·त
त्संसर्गमभिव्याहृतपदार्थबोधत्वमेवावच्छेदकमित्यपि न·अनंतकार्यकारणभावप्रसंगात्·अथ विशेष्यत्व
प्रकारत्वादिसंबंधेन शाब्दबोधत्वमेव वृत्तिज्ञानकार्यतावच्छेदकमस्तु·तेन च संबंधेन न शाब्दत्वं वाक्या
र्थीयं·अतानतत्रवृत्तिः कल्प्या·न च लाघवाद्विषयतैव तत्कार्यतावच्छेदिका तस्या एकस्यास्त्रयसा
धारणायाऽभावात्·विशेष्यत्वादित्रयस्य च सामान्यशब्देनाभिधीयते·विशेष्यादित्रितयव्यवहारानुरो
धेन विषयतात्रयस्यावश्यकत्वादिति चेन्मैवं·ज्ञानातिरिक्तविषयतायामानाभावात्तज्ज्ञानसंबंधेन शा
ब्दत्वेस्यैव कार्यतावच्छेदकत्वात्·तत्तद्विषयकविशिष्टज्ञानस्यैव विशेष्यत्वादिरूपत्वात्·अतिरिक्तविषयता
पक्षेप्येवमेव व्यवहारस्य लक्षणारोपापपत्तौ त्रैविध्यानौचित्यात्·एवं च तत्तद्विशेष्यप्रकारकविशिष्टविषय
तायाः संबंधत्वे विपरीतं गौरवं स्यात्·दंडीति बोधात्परं दंडिमनिति बोधात्तज्जनकतावच्छेदिका दंडित्वादिज्ञा

वै·भू· नञ्प्रतिबंधकतावच्छेदिकावदंडीत्यत्र दंडपुरुषसंयोगसाधारणप्रकाविषयितावाच्या सैव शक्तिज्ञानकार्य
२१८ तावच्छेदिकाऽस्तां। अत्र दंड इति ज्ञानाद्दंडीत्यादिव्यवहरणं तु वाक्यशक्तेरपि वेत्यपि वदंति· एवं सत्यपि ग्रहश
218 क्त्यर्थ एव वाक्यार्थस्तर्हि पदार्थोपि तथैव स्यात् उक्तं हि वाक्यपदीये· अशब्दो यदि वाक्यार्थः पदार्थोपि
ततया भवेत्· एवं सति च संबंधः शब्दस्यार्थेन हीयत इति· तस्माद्वाक्यार्थवाचकं वाक्यमिति सिद्धं· अत एव
तस्य वाक्यार्थत्वं किंवदंती संगच्छत इति विभावयामः॥ माच्यास्तु न वाक्यार्थबोधकतया वा स्फोटसिद्धिः।
पदानामेवान्विताभिधायकत्वात्· पदैरेवार्थप्रतीत्युपपत्तौ तत्र प्रमाणाभावात्· तदेतत्तृतीयाध्यायहृतीयच
रणसमाप्तावुक्तमनुव्याख्याने कर्तृकर्मक्रियाणां तु पूर्णको न्यान्वयो भवेत् अपूर्तिश्च तदेरुक्तौ किं
तच्छृंगेण पूर्यत इति स्म त्रजयतीर्थः। कर्मेत्युपलक्षणं। जिज्ञासितानां पदार्थानामित्यर्थः। भवेत्· प्रतिपा
दनीय इति शेषः। स्फोटमन्वयप्रतिपादकं वदतां तत्र प्रमाणं वाच्यं· तच्च न· अन्वयबोधस्य पदैरुपपत्तेरिति
भावः। एवमनंगीकारे बाधकमाह· अपूर्तिरिति· अन्वयस्येत्यादिः· शृंगेण· स्फोटेन· अप्रमाणकत्वात्त २१८

सादृश्यं॰ पदादन्वयबोधवादिनो लाघवं पदानामावश्यकत्वात् स्फोटवादिनो गौरवं निष्प्रमाणकस्फो
टस्य गस्यान्वयबोधकत्वस्य च कल्पनीयत्वादिति भाव इति व्याचख्यौ॰ तस्माद्वाक्यार्थप्रतीत्यर्थं न स्फोट इ
त्याहुः। तदेतदुक्तं॰ पदानामन्विताभिधायकत्वे घटादिपदमितरान्वितघटशक्तमिति व्युत्पन्नस्यापि
घटमित्यानुपूर्वीज्ञानतात्पर्यज्ञानादिमतोऽपि च घटकर्मकानयनमिति बोधः प्रागुक्तकार्यकारणभा
वग्रहाभाववतोऽपि भवेत्॰ न चेष्टापत्तिः॥ विशेषणविशेष्यभावविनिगमनाविरहात् सामान्यत इश
तया च तदन्वितो घटः इतरान्वितं कर्म। कर्मत्वमित्येवापत्तेः। न घटीयं कर्मत्वमिति॰ त्वयाश्रयणीं
कारात् घटः कर्मत्वमानयनं कृतिरित्येतेतरान्वितकर्मत्वतादृशआनयने इत्यादिशक्तिग्रहवतो बोधा
पत्तेश्च॰ अत एव तत्रैवानुव्याख्याने। यदा शेषाणामुक्ति॰ सामान्यतोऽभवेत्॰ पदैकेनाप्युक्तरणविशेषा
वगतिर्भवेत् अतः सामान्यतो ज्ञातः पदान्तरवशात्तु नः। भवेद्विशेषतो ज्ञातस्तेन स्यादन्वितोक्तितेति॰
प्रथमाध्याये वोक्तं सुधायां॰ शक्तिश्चैवाचितश्चार्थ इति कारिकाव्याख्यायां। विशेषान्वयप्रतिपत्त्यर्थंप

तत्समभिव्याहारोपयोग इति । यद्वा तत्समभिव्याहाराद्विशेषप्रतिपत्त्युपपत्तेरिति चेति । तस्मात्तादृशस-
मभिव्याहारकार्यकारणभावावच्छेदकत्वमात्तु पदानामन्विते शक्तिरिति सिद्धं । किंच सखण्डवाक्यस्फोटखं-
२११ डनेमतद्वयेऽप्यवाच्यता घः । पदसमूहरूपस्यानुपूर्वीघटितस्य तात्त्विकविरोधापत्तेः । नास्त्येवेति तु वक्तव्यमिति । तस्मात्स्फो-
211 टपदस्याश्रवणमात्रात्खण्डनेन तन्मतानां न विजृम्भितमेवेति ध्येयम् । एतेन कार्यान्विते शक्तिरपास्ता । केचित्तु पदाना-
मन्विताभिधायकत्वे घटमानयेत्यत्र वाक्ये चतुष्टयापत्तिः । इतरान्वितो घटः । तथा कर्मत्वान्तरं चैवानयने तथै-
व कृतिरिति । न च तत्त्वापि चैत्रो घटमानयतीत्यत्रोद्देश्यघटीयं कर्मत्वं तदीयमानयनं तदीया कृतिस्तदाश्रयश्चैत्र
इति विशेष्यभेदप्रयुक्तवाक्यभेदापत्तिः । अस्माकं सर्वशक्यः । भवतां पुनरखण्डवाक्योपस्थाकाले सादित्वमपि इत्यत्रै-
व विशेषादिति वाच्यं । नहि विशेष्यभेदाद्वृत्तिमापादयामः किंतु शक्तिभेदात् । मम तु घटप्रकारककर्म-
त्वविशेष्यकशाब्दबोधे घटपदोत्तरं द्वितीयोत्पादिकार्यकारणभावनानात्वविरहान्न दोषप्रसङ्गः ।
एतेन नृसिंहाश्रमैस्तत्त्वविवेकादावुक्तं वृत्तिविनाशाद्बोधविषयतासंभवाद्वृत्तिर्व्याप्याद्यविषयिणी २११

त्वात्कार्य्या·सावातिरिक्तांशे गौरवान्नेति स्रून पदार्थशक्तिरेव तद्विषयीकरिष्यते। पदानामन्वयसामान्ये
शक्तौ तु विशेषपर्य्याप्तस्य सामान्यबुद्धेरपर्यवसानात्तत्पदसामान्यशक्तिभिरेव समभिव्याहृतपदोप-
स्थापितपदार्थविशेषनिरूपितान्वयविशेषः सेत्स्यतीत्येकशक्तिलाघवो किंच कपदप्रयोगेप्यन्व-
यविशेषस्य नियमेन जिज्ञासादर्शनात्तस्याश्चान्वयसामान्यपूर्वकत्वात्तज्ज्ञानस्य च शब्दादन्यतोऽसं-
भवाच्छब्द एवान्वितमभिधत्त इति वाच्यं· दृष्टजंबीरफलादौ रसविशेषजिज्ञासावद्भविष्यतीति चेन्न।
तत्र नियमेन तदभावात्· अन्यथा वैशेषिकमत इव व्याप्तिप्रतिसंधानदशायामेव शब्दादर्थसंसर्गाऽती-
यत इति शब्दस्याप्रमाणं स्यादिति पदस्य पदैः अन्वयांशे शक्त्यनभ्युपगमे घटः कर्मत्वमानयनं कृतिरि-
तिपदजातादन्वयधीः स्यात्तद्योग्यतादेः सत्त्वात्· नवैतादृशपदजातं शक्तिलाञ्छकत्वमिवांकुरं स्वरूपा-
योग्यं। एवं सति विपरीतमुत्पन्नस्यापि बोधानापत्तेः। न च शक्तिभ्रमात्तस्यान्वयधीः। स्वरूपायोग्यस्य सह-
कारिशतेनापि कार्याजनकत्वात्· तस्मात्स्वरूपयोग्यमेवान्वयांशेऽपि शक्तिज्ञानरूपसहकारिसत्त्वा-

द्विपरीतत्वमुक्तमन्वयबोधकं। अन्यं प्रतितद्द्विति तत्तान्निलक्ष्यन्वयांशे ज्ञाप्तिरवश्यमुपेयेति विवर
२२० णाच्चार्यानुमापिनोऽपि वदन्ति। तदप्यपास्तं बोधकेतानुरूपापाः शक्तेरन्वयबोधस्यापि जायमानत्वात्त
220 दंशे स्वीकार आवश्यक इति सत्यापरं तु सावाक्यएव स्वीकर्तव्या नतु पदे। तथापि समभिव्याहारोपि
कारणमिति तत्र ज्ञानस्य हेतुत्वे गौरवापत्तिरित्युक्तं। घटः कर्मत्वमित्यादावाकांक्षाज्ञानविरहाद्बोधवि
रहः। अन्वयांशे शक्तिज्ञानवतोऽप्यबोधात्त्वेत्युक्तं। एवं जिज्ञासानुरोधादन्वयसामान्ये शक्तिरित्यप्यसं
गतं। दृष्टे समीचीन फले रसादिजिज्ञासा वृदुपपत्तेः। तर्हि तद्देवात्रापि जिज्ञासा नियमो नस्यादिति चेदि
ष्टापत्तेः। किंचैवं घटान्वयाविशेषरूपेणाशक्यः स्यात्। जिज्ञासायास्तथात्वात् ज्ञाने छ्यो समानप्रकारक
त्वेन हेतुहेतुमद्भावात्। अन्यथाद्रव्यत्वादिना ज्ञाते सुवर्णत्वादिनाऽज्ञाते न रूपेणेच्छापत्तेः। नन्वेवं सति
जिज्ञासाच्छेदः। येन रूपेण ज्ञानं वृत्तं तेन रूपेणास्ति द्वित्वादिच्छाया असंभवात्। येन च रूपेण न ज्ञान
मवृत्तं तेन रूपेणाकारणाभावेनासंभवादिति चेन्न। सिद्धत्वज्ञानस्यैव सर्वत्र प्रतिबंधकत्वात्तदभावादेव २२०

जिज्ञासोपपत्तेः। घटो मेऽस्त्वितीच्छायामसिद्धेऽपि तस्मिंस्तत्सिद्धत्वाज्ञानादिनेच्छानिवृत्तेर्दर्शनात्। न चये
तद्रूपेणायं नेच्छा तेन रूपेणासिद्धत्वधीरेव प्रतिबंधिके परं त्वास्तु। अत्र तु सा सिद्धिरेव प्रतिबंधिका कल्प
तौ लाघवात्। घटज्ञानं मे जायतामितीच्छायां जाते तस्मिंस्तत्सिद्धत्वप्रतिसंधानमंतरेणैच्छानिवृत्ते
रनुभविकत्वाच्च। अनभ्यासगोरवाच्चेति वाच्यं। घटस्य ज्ञानं भवत्विति इच्छायामजाते च तज्ज्ञाने तस्य ज्ञा
नं जातमिति सिद्धत्वज्ञानादिच्छानिवृत्तेः सर्वानुभवसिद्धाया अपलापापत्तेः। सिद्धेर्व्यधिकरणत्वे न प्र
तिबंधकत्वासंभवाच्च। यदानीमे ज्ञानं भवत्विति इच्छायां तदानीमे ज्ञानमित्यादिकालांतरीयज्ञानविष
यकसिद्धत्वज्ञानेनापि प्रतिबंधाच्च। तस्मान्न जिज्ञासानुपपत्तिः। अथवा पूर्वं विशेषतः संसर्गावगमेऽपि
स आपातरूप एव। कथमन्यथाऽस्य जिज्ञासा स्यात्। प्रपंचितं चैतद्विकारणाजलत्वविवेकादावेवेति ध्ये
यं। एतेन सामान्यतो ज्ञाते विशेषतो जिज्ञासेति वदंतः सर्वेऽप्यपास्ताः। तथा च सामान्यतोऽन्वयः शाब्दत्वसं
गतः। अथ सामान्यतोऽन्वयः शाब्दस्तेनानुमितं विशेषे जिज्ञासेति नोक्तदोष इति चेन्न। तथा सत्यनुमानेन सं

संसर्गोपस्थितेस्तैवोपपत्तेः शब्दस्याप्रामाण्यापच्छेदप्रसंगात् । अन्यथा वैशेषिकमतइवेति स्वोक्तिविरोधश्च । पदार्थैरे
२२१ वानुमितेविशिषेजिज्ञासासंभावाच्च । सामान्येनोपपन्नेव यस्याशाकयत्वं स्यात् । अपि चापदार्थवाक्यार्थयो
221 र्नियमस्याप्रपूर्वग्रहात्फलविशेषदर्शनाद्वा सविशेषस्यैव जिज्ञासानुपपन्ना । न चैवं शब्दस्यापि भवद्रीत्यैव प्रमा
णत्वं न स्यादिति युक्तमिति वाच्यं । नमवेदेव यदिनानुमितं न साक्षात्कृतं किन्तु शब्दादेवावगतमित्यनु
भवो न स्यात् । तर्भी चैतादृशानुभवादाकांक्षाज्ञाननिर्वाह्यविशेषणविशेष्यभावाद्यनुरोधाच्च शब्दः प्रमाणा
न्तरं न तत्र भवद्रीतिः सध्री । पठितविस्मृतश्लोकस्य बोधादर्शनाच्छक्तिः स्मरणमुद्बुधः शक्तिसंस्कारो
वा हेतुरिति मतद्वयेपि भवन्मतेस्यान्तं शब्दानत्याप्रामाण्यासिद्धेः । तथा हि । बोधकत्वं हि शक्तिः श्रितिवि
विवरणाचार्यादिभिरुक्तं तच्च बोधकारणत्वं । तच्च शब्दस्य ज्ञानद्वारा । लिंगस्येवानुमितौ । तथा च का
रणतायां व्याप्तित्वात्तज्ज्ञाने व्याप्तिज्ञानमेवेति कथं नानुमानविधयाप्रामाण्यमुद्बुद्धो व्याप्तिसंस्कार एव
हेतुरितिस्वीकारेणाभवतोपरं स्फुतरां दोषः । तस्मात्प्रामाण्यं तरेणासंसर्गोपस्थित्यसंभवाच्च शब्दशक्ति २२१

रित्युक्तमेवेतिदिक्। यत्तु पदार्थास्तत्स्मृतिर्वा शाब्दबोधे हेतुः। न तु पदज्ञानं वाक्यज्ञानं वा व्यभिचारात्। उ
क्तं हि। पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः। खुरविक्षेपशब्दं च श्वेतोऽश्वो धावतीति धीरिति। तन्न। न
थासति चक्षुरादिना पदार्थोपस्थितौ शाब्दबोधापत्तेः। शब्देनापममर्थबुद्ध्यदस्त्वनुभवाच्च। पश्यतस्त्वादा
वशाब्दत्वानुभवादनुमानेनैव निर्वाहाच्चेतिदिक्। तस्माद्वाक्यार्थवाचकं वाक्यमिति सिद्धो वाक्यमि
ति सिद्धे वाक्यस्फोटः। नन्वेवं पदार्थवद्वाक्यार्थोपि नानुभूयेतेति चेन्न। न तावद्वाक्यार्थप्रतीतिरनुभवः। स्व
र्गनरकादिकं श्रुत्वापि स्वर्गनरकं वानुभवामीत्यप्रतीतेः। किंतु स्मृतित्वादिव्याप्यमनस्त्वावाशाब्दत्वा
दिकं जातिरनुभवत्वलात्। न त्वारणं पुनरुक्तरीत्या वाक्यज्ञानमिति। नन्वेवमपि न पदज्ञानवाक्यज्ञान
योः संभवः। उत्पत्तिपक्षे एकदा तदभावात्। तथा च न वर्णसमूहरूपपदप्रत्यक्षे स्तुतरां तत्समूहरूपस्य वा
क्यस्येति चेन्न। इष्टानां तरेस्तूक्तदोषतादवस्थ्यात्। अथ प्रत्येकवर्णानुभवजनितसंस्कारसहकृतेनान्त्य
वर्णप्रत्यक्षे समये सदसदनेकविषयापदप्रतीतिरेवं वाक्यप्रतीतिः श्वोपपद्यत इति मतान्तरं चिंत्यम्। एवं

हिगिरिर्भुक्तमग्निमान् देवदत्तेनेत्यत्रैव वाक्यज्ञाने समूहालंबनरूपविशेषाभावाद्दोषापत्तेः। सरोर
२२२ सोनदीदीनजराजेत्यादावुपस्थितेस्तत्तत्त्वाद्दोषाविशेषापत्तेश्चेति। यत्तु जयतीर्थेनोक्तं। अनुभवक्र
122 माप्रहितानामेव तेषां स्मृत्यावगाहनात्क्रमव्युत्क्रमयोरविशेष इति। तन्तुच्छं। अनुभवस्मृत्योः क्रमेणियमा
भावात्। दृश्यन्ते च प्रपूर्वेष्वनुभूतमस्मृत्वापि पूर्वेष्वनुभूतस्य स्मरणं। किंच संस्कारस्मरणयोः समान
विषयत्वात्क्रमस्य च संस्कारविषयत्वेन स्मरणविषयत्वे। एवं च समूहालंबनरूपं स्मरणमपि घकाराकार
टकारादिति मंवन्न तु घटटत्वे तादृशमिति। अथोत्तरवर्णोत्पत्तिकालेऽव्यवहितोत्तरत्वसंबंधेन पूर्वव
र्णवत्त्वमुत्तरोत्तरवर्णे। एवं च उत्तरवर्णोत्पत्तिकाले उपस्थितविशिष्टतद्वर्णवत्त्वमुत्तरवर्णेऽस्मुमह
ति तादृशानुपूर्वीघटितपदत्वं सुग्रहं। एवं वाक्येपीति मतं। सममेमदस्माकमपीति। एतेनेतदनुप
पत्त्या गवेडस्फोटाभ्युपगमः कैयटोक्तोन श्रद्धेयः। इदानीमस्वेऽपत्तमाह। पदेन वर्णा विधेनेव
र्णाभ्ववयवान्व। वाक्यात्पदानामतीमप्रविवेकानकश्चनापदपचतीत्यादौ न वर्णाः। तत्र दृष्टांत व्याजमा २२२

हवर्णेष्विति। यथा नवर्णेष्ववयवास्तथेत्यर्थः। इवेति पाठः सुगमः। एवं वाक्येप्याह। वाक्यादिति। अत्रैकत्वे वि
वेकोनास्ति। अयंभावः। वाक्यपदयोरवयवेष्वेवानन्तवर्णकल्पने मानाभावात्। ककारादिकं शृणोमीति
प्रतीतिर्मानमिति चेन्न। तस्या अखंडपदार्थविषयत्वात्। तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयोगविशे
षाभिव्यक्ता खंडपदार्थस्यैव ककारत्वादिना प्रतीत्युपपत्तेः। अथाखंडपदार्थस्यैव व्यंजकेषु विशेषात्ककत्वादि
नाप्रतीतौ ककारोत्पन्न इति न स्यात्। व्यंजकनिष्ठा या उत्पत्तिस्तत्रारोपाभ्युपगमे ज्ञानादीनामपि नित्य
तापत्तिः। किंचाघटत्वदर्पिकपात्रसंयोगविशिष्टस्फोटरूपत्वापत्तिः। नित्यत्वापत्तिश्चेति चेन्न। सत्का
र्यवादिना नित्यताया ज्ञानेनाप्यदृष्टत्वस्य पक्षसमत्वात्। घटादिकं वा विद्याविद्याकल्पितो मद्दृश्या
वस्थाविशेषः। आविद्यकजलाहरणादिकार्यानुरोधेन स्वीकारावश्यकत्वात्। उत्पत्त्यादिप्रतीतिरपि
व रूपमतारीत्या नानुपपन्नेति। नन्वेवं विलक्षणवायुसंयोग एव तद्धेतोरिति न्यायाद्वाचकोपि स्यादि
ति चेन्न। प्रत्यक्षोपलभ्यमानककारादेरेव वाचकत्वस्यानुभवसिद्धत्वात्। स्फोटस्याचक्षणोमीत्यनुभवाद

वश्यकत्वात्· तस्माद्वायुसंयोगनिष्पंत्त्या द्रागजनकतावच्छेदकं वैजात्यमादायैव ककारत्वादिप्रत्यक्षता
२२३ रत्वादिवत्· सएवहिमामत्वां ।। तारत्वादिवायुनिष्ठं वर्णोपचारोप्पतइतिदेवताधिकरणोभिहितं। अस्मि
223 न्नेवपक्षे वर्णा अप्यनावश्यका इति चोक्तं शब्दकौस्तुभे· तथा च प्रत्येकं चाकात्वान्यथानुपपत्त्यात
देवदंपदं तदेवदंवाक्यमिति प्रतीत्या वाक्यरूपस्फोटः सिध्यतीति ध्येयं। यत्तु प्रथमाध्याये प्रथमवरोउ
तमनुव्याख्याने। शक्तिश्चैवान्विते स्वार्थे शब्दानामनुभूयते। अतोन्विताधायित्वं गौरवं कल्पनेन्यथेति
व्यवहारेणान्वितएवशक्तिरनुभूयते पदानामितित्वत्वा शब्दानामित्युक्तिः प्रकृतिप्रत्यययोरप्यन्वि
ताभिधानमिति बोधयितुं परमतं दूषयति· गौरवमिति· अन्यथा कल्पनेवाक्यं वाक्यार्थबोधकमि
ति वाक्यमेवास्त्वेवं कल्पनीयं तस्यार्थप्रत्यायनशक्तिश्च कल्पनीयेति गौरवमिति भावइति जयमीर्थः ।त
न्नेच्छे। अर्थप्रतीत्याद्यन्यथानुपपत्त्या तस्यावश्यकत्वात्· अन्वितं शक्तिश्च स्फुटतरं प्राङ्· सिद्धत्वात्·
किंच गौरवं तत्तैवावपर्णीतं अनेन तवार्णादेः कल्पनात्· यत्र त्वाहजयतीर्थः। नार्थप्रतीत्यन्यथानुपपत्त्या २२३

तत्सिद्धिः। तथाहि। किमयं स्फोटरूपोऽर्थप्रत्यायकः प्रतीतो वा न वा। नाद्यः। सर्वदा तदर्थबाधापत्तेः। अंत्ये किमनयानु
पपत्त्या तत्प्रतीतिरुत प्रमाणांतरेण। नाद्यः। अन्योन्याश्रयात्। प्रतीते स्फोटत्वप्रतीतिस्तथा च तत्कस्य नामिति
। नांत्यः। प्रमाणांतराभावात्। एकं पदमेकं वाक्यं शृणोमीति प्रत्यक्षेणैव तदूहइति चेन्न। विचार्यमेतद्धि।
किमयं प्रत्यक्षवर्णानवगाहते तेन वेति। आद्ये। अस्तु तेषामेव वाचकता। आवश्यकत्वात्। अंत्ये प्रती
तिबाध एवेति। तदशुद्धं। एकं पदमित्यादेर्वर्णविषयस्यापि तत्त्वाकारीत्यामानत्वोपपत्तेरिति। अत एव
ध्वनिरूपमप्युक्तं सिद्धमेव। तथा च ध्वनिस्फोटयोर्मध्ये नित्यत्वं गुणागुणीकारेऽगौरवात् तन्मात्राभावाच्च ध्वनीनामेव त्वा
ता दमत्वात्तत एव च वर्णाः। एवं च सा वर्णावली तत्तदर्थविशेषेणागृहीतसंबंधा स्फोटतदेकत्वाद्य
निर्व्यंजका। गृहीतसंबंधा वा। नाद्यः। काव्यादिश्रवणात्तदर्थागृहीतसंबंधस्यापीदमेकं पदमित्युप
पत्तेर्नानयोपपत्त्यात्तत्सिद्धिः। उक्तं च। यस्त्वेकः प्रत्ययः सोपि याथेकेन लीयसा। औपाधिकत्वयानीतस्त
स्मात्स्फोटानमानभागितिः एवं वाचकत्वमपि तादृशं स्ववस्मादिति न साप्यनुपपत्तिः। नापि तदेवं दं वाक्य

मितिप्रतीत्यात् तत्सिद्धिः। तदेवं दनरवं तरऽते केशांसोयं समुद्र इति वडुपपत्तेः। अतिरिक्तके शादिक्रमनुभ
२२४ 224 वानान्नूट मिति चेन्न। गौरित्यत्रापि गकारौकारविसर्गातिरिक्तस्फोटानुभवस्य कस्याप्यभावात्। किंच पर्याय
शब्देष्वेक एव स्फोटो नानानां वा। नाद्यः। घटकलशादिपर्यायाभिव्यक्तेः स्फोटे गृहीतशक्तिकस्य पुंसो ऽश्रसि
द्धपर्यायश्रवणेपि प्राग्गृहीतशक्तिकस्यैव स्फोटस्यैव नाभिव्यक्तार्थप्रतीत्यापत्तेः। न च तत्पर्यायाभिव्य
क्तस्फोटे शक्तिग्रहस्तत्पर्यायश्रवणार्थधीर्नु इति वाच्यं। एवं हि प्रतिपर्यायं शक्तिग्रहावश्यंभावे तत्पर्या
यगतशक्तिग्रहहेतुतायाएवौचित्यात्। तथा सति शक्तिग्रहत्वेनैव हेतुत्वे लाघवात्। अन्त्ये यातत्प
र्यायाभिव्यक्तगतशक्तिग्राहकत्वेन तत्त्वेव वेदकगौरवात्। न द्वितीयः। अनंतपदार्थानां तेषां शक्तिवोपस्थ
त्कल्पनवर्णेष्वेव शक्तिकल्पनस्य लघुत्वात्। तस्मात् स्फोटवादो ऽयुक्त एवेति न्यायतामस्थापरिम
स्तयोर्निष्कर्षोप्यपास्तः। वर्णेष्वत्यस्थापितत्वमानृता याः स्वोकारातापर्पापस्य त्वेष्वेके वृशक्तिः। प
रत्वानुपूर्व्यैवावच्छेदिका। वर्णानामपि तदतिरिक्तता भावेनोक्तदोषकाभावादित्युक्तं। ये तु वर्णानां तदतिरि २२४

क्तध्वनीनां वा स्वीकारपक्षेपि स्फोटस्य वाचकत्वं समर्थयन्ते। वर्णातिरिक्तः स्फोट एव वाचकत्वान्यथानुपप
त्त्या कल्प्यते- न च वर्णा वाचका इति युक्तं। अनभिव्यक्तानां वाचकत्वेति प्रसंगात् अभिव्यक्तेश्चासंभवात्- प्र
त्येकविषयस्यापि हेतुत्वात्- न च स्मरणासंभवति। एवमपि वर्णानामनेकत्वेन कारणत्वायोगात्। ज्ञानेन कारण
मिति पक्षेपि पदार्थस्मरणोपयोगिनस्तस्यासंभवात्- न च पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकारेण श्रोत्रेण क
दा स्मरणं युक्तं तदेकमनेक वा ओघ। क्रमाभानात्सरो रस इत्यादौ विशेषो न स्यात् अन्त्ये ज्ञाने यौगपद्यापत्तिः। एव
मेकं पदमेकं वाक्यमिति प्रतीतिरपि नत्रमाणां न चैकवनमिति वत्सावनराश्यादेरप्यतिरिक्तत्वात्- किं च। तत्रैक
देशावच्छिन्नत्वोपाधेरेकत्वेन सोपाधिरेव प्रतीतिः स्यादिति स्यात्- प्रकृते चोपाधेरसंभवेन तदसंभवात्- न चैकार्थबो
धहेतुत्वं तथा। व्याससमासयोरपि प्रसंगात्- नाप्यविशिष्टैकार्थप्रत्ययजनकत्वं समासेष्वव्याप्तेः। घट इत्यत्र प्र
कृत्यांशेतिव्याप्तेश्च- अस्मन्मते वारखंड वाचकमेकं स्फोटमादायैकत्वप्रत्ययस्तु व्यंजकाश्च वर्णाः। तदस्वीकारे ध्व
नयः। प्रतीतिविलक्षणमपि ध्वनिकृतं। तदुक्तं वाक्यपदीये यथा मणिकृपाणादौ रूपमेकमनेकधा- तथैव ध्वनिषु

स्फोट एक एव विभिद्यत इति। साहृदुपादिप्रतीतिरपि व्यंजकध्वनिनिबंधनैव। आहुश्च वैकेपटोपीत्याकुः। स्या
२२५ 225 दयं प्रायुक्तस्तेषां दोषः। किंच तथैवार्थबोधानुपपत्तिः। वर्णानां प्रत्येकव्यंजकत्वे समुदितानां वा। नाद्यः। प्रत्ये
कात्स्फोटप्रतीतौ तावतैवार्थबोधापत्तेः। नान्त्यः। त्वदुक्तरीत्या कासंभवात् संभवे तावद्वेतोरितिन्यायेनार्थबोधस्या
पि तत एवोपपत्तेर्वाचकत्वान्यथानुपपत्तिरपि। अयत्वन्मतेप्ययं दोषः। तन्न द्रुतोत्पादकत्वाभिमतवायुसंयो
गानां प्रत्येकमभिव्यंजकत्वे समुदितानां वेति विकल्पग्रासादिति चेदुच्यते प्रत्येकमेव संयोगा अभिव्यंज
काः। परं तु केचन कत्वेन केचन हत्वेन सर्वे केः प्रकारे। अत एव वर्णानां तदतिरेकास्वीकारोप्युपपद्यते। तच्च
वायुसंयोगादिनिष्ठमेव तत्तदारोप्यते। एवं का व्यवहितोत्तरत्वसंबंधेन पूर्ववर्णत्वं च कारणत्वं यतोऽतादृशपदज्ञा
नकारणतायाम् अविवादात्। परं तु पश्चिमोत्तरत्वस्वज्ञानाधिकरणक्षणोत्पत्तिज्ञानविषयत्वं वाच्यम्। अतएव
घज्ञानेतरज्ञानविषयत्वरूपानुपूर्वीज्ञानमित्यादिनैयायिकवृद्धानां व्यवहारः। एवं च न कश्चिद्दोषः। यत्तु
श्रूयमाणशब्दे किमयं हालाहलशब्दः किमयं हलाहलः किमयं मरकतशब्दः किमयं मकरतशब्दो वा। २२५

किमयंकशशब्दः किमयंकुशशब्दः किमयंकुशशब्दोवेति संदेहे यथा तथास्तु विपरीतदर्शनाच्च कोभवत्येवेत्या
दिनिश्चितो बोधोनस्यात् स्फोटाभिव्यक्तौ स्फोटाभिव्यक्त्यापत्तेः। अनभिव्यक्तो बोधकाभावादिति न्यायरत्ना
मरणावुक्तं तत्खिंत्य वर्णसमूहरूपपदज्ञानं कारणमिति स्वीकर्तृणां दर्शनांतरणामपि तुल्यत्वात् तदर्थज्ञा
पकत्वज्ञानं वसमापि समम् इति। पद्यः किंचित्प्रत्यक्षमेव स्फोटाभिव्यक्तिर्जायते। अग्रे अग्रे विशदज्ञानोत्पत्ति
पूर्वंज्ञाता पिनार्थबोधापयागिनी। यथा रत्नतत्त्वे संकदादर्शनेपि नाभिव्यक्तिः वारंवारदर्शनेतु भवति
उक्तंच- सामसेनतु तद्व्यक्तिः सर्वांतिमरणात्त्ववदिति। ननु भवति वेत्पादावर्थबोधापत्तिरिति चेन्न तत्र वापिवा
चकसत्वादर्थबोधापत्तिः। वर्णानुपूर्वीति याम कनियम्याभिव्यक्तेरर्थबोधोपयुक्तत्वात् नच दृष्टांतो विषमः।
रत्नादृशजातिमानस्तु कशब्दवाच्यइत्येवं दर्शनांतरणामपेक्षणात् इति वाच्यं। प्रथमदर्शने जाते खगमेएता
दृशजातिमानस्तु केशब्दवाच्यइत्यस्यापि ग्रहणापत्तेः। अस्माकं पुनर्ज्ञात्यग्रहादेव विलंबः तत्र यावद्विजातीय
व्यपहाज्ञातिग्रहवद्विजातीयाभिव्यक्त्यार्थबोध इति। अथ प्रथमदर्शनेएव जातिग्रहस्य तदा पदे पुनरुत्तज्ञानस्य छि

२२६ न्न वाचकं न स्मर्यत इति चेन्न ममापि स्फोटो व्यज्यते। अर्थस्मरणं पुनर्जायत इत्युपपत्तेः। पदतदर्थयोः शक्ति
लक्षणासंबंधस्य परस्परस्मारकत्वविशेषात्। विजातीयाभिव्यक्तेः पदस्मारकत्वं द्विजातीयाभिव्यक्तेरर्थ
226 स्मारकत्वादिति दिक्। यत्तु वर्णानां व्यंजकत्वं व्यवमेवोपपन्नमिति तन्तुच्छं। एवं हि स्फोटासिद्धेरुक्तत्वात्
अत एव व्यंजकतावच्छेदकविशिष्टकार एव व्यंजकः। पूर्वपूर्ववर्णविशेषितोत्तरवर्णविषयकत्वं तत्त्राभ्युपगमात्।
एतेन घ्यमादिवर्णैरविशदस्फोटाभिव्यक्तिर्नानुभवसिद्धेति निरस्तं समाध्यंतरसत्वादिति न्यायरत्ना
मणिस्थः स्फोटवादनंगीकृत्य समाधिः प्रत्युक्तः। ग्रंथकृतं स्वाकृतः वर्णमालायां पदमिति प्रतीतेर्वर्णाति
रिक्तश्च स्फोटः। अन्यथाकल्पनातिरिक्त घटसिद्धिप्रसंगश्चेति गिति सुधीभिर्विभावनीया। इत्यानन्वेर्व
र्णस्त्राप्रामाण्यप्रसंगः पदवाक्ययोरखंडत्वात्। शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादनमौत्वार्थत्वादि
त्याशंकां समाधत्ते। पंचकोशादिवत्तस्मात् कल्पनेषा समाश्रिता। उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः
उपेयप्रतिपत्त्यर्थत्वेनानन्वयः। तथा हि। मदगुर्वी रुणाद्वेर्गुणं पितरं ब्रह्म एवं वान्सइति। नत्राप्याशितमते २२६

न्नं त्रेधा भवति यत्स्थूलं तत्पुरीषं यन्मध्यमं तन्मांसं यदणीयस्तन्मन इति श्रुतावुक्तत्वात् श्रवणात् पृष्ट
वान् । ततो विज्ञानमय इति । तस्यापि वृत्त्युपहितत्वेन तथात्वं बुध्वा पृष्टवान् । तत आनन्दो ब्रह्मेति । पुनर्वस्तु
तत्त्वं प्राप्य स्थित इति नु केचिद्व्याचक्षते तन्न तन्नापि च मनस्यनन्तानपायत्वात् । अकोशत्वाच्चैतस्मात्तस्मान्न भृगु
वल्लीहोदाहर्तव्या । किं त्वानन्दवल्ली । तत्र त्वा हि पञ्चापि कोशा उपाया एव । तत्र हि ब्रह्म पुच्छं प्रतिष्ठेत्यत्र
श्रूयमाणमेव ब्रह्मपदं मुख्यब्रह्मसमर्पकम् । अत एवाधारतार्थकः पुच्छशब्दोऽप्युपपद्यते । लाङ्गूलासं
भवेन मुख्यार्थस्य बाधितत्वात् । कथं तर्हि । नेदमयोऽभ्यासादिति वैयासिकं सूत्रमिति चेत् । आनन्द
मयस्याभ्यासात्तदन्वयोऽपि श्रूयमाणब्रह्मपदे तात्पर्यादित्यदिश्यन्ते । भृगवल्यादिष्वप्रभृतिभिः प्रपञ्चितं । एवं च
यथा पञ्चकोशा अपि सर्वाधारब्रह्मबोधनाय बोध्याः । ननु वास्तवमेषाब्रह्मत्वं तथैव प्रकृतिप्रत्ययादिभि
र्विचारोऽप्येवं स्यात् । स्फोटबोधनोपाय इति भावः । ननु ब्रह्मवत् तस्य स्फोटस्य श्रवणादित्यतोऽपि बोधसंभवान्न
शास्त्रं तदुपाय इति चेन्नाह । उपाया इति । उपायस्योपायान्तरादूषकत्वादिति भावः । अत एव केचित्तु

॥

त्यये केचित्तिप्रत्ययं केचिदुप्रत्ययं च विदधति । तदेतदभिप्रेत्याह वाक्यपदीये उपायाः शिक्षमाणानां
२२७ 227 बालानामुपलालनाः । असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते इति । अत एव दंतिन्नैतच्छास्त्रं स्फो
टज्ञानार्थं पंचकोशवदुपायः शास्त्रज्ञानं विनापि गमानयेति वाक्यमात्रमुल्लम्ब्य पामरादेपि शाब्दबो
धात् । तस्मात्स्फोटज्ञानं विना बोधानुपपत्तेः शास्त्रज्ञानं च शास्त्रमंतरेणेति व्यभिचारात् । शास्त्रस्योपायांत
रत्वे च शास्त्रजन्यस्फोटज्ञानेत्वाजन्यतावच्छेदकमिव ह्वैवेजात्ये वाच्या तत्र च न प्रमाणाभावात् ।१
किंच प्रकृतिप्रत्ययादेः काल्पनिकत्वेन शशविषाणकल्पनपातेन न स्फोटात्मकवस्तुज्ञानसंभवः
।पंचकोशादेश्च सदसद्विलक्षणात्माया अद्वैतशास्त्रे मुख्यादिततादिति । अत्रो व्यते भाषासंस्कृत
साधारणः स्फोट एव वाचकः । तज्ज्ञानं च श्रोत्रप्रत्यक्षादिरूपमपीति सत्यं किंतु वर्णावत्त्वे कृति
प्रत्ययापन्नोपि स एवापरं तु प्रकृतिप्रत्ययादिभिर्व्युत्पादनपूर्वकेन ज्ञानेन तत्पूर्वप्रयोगद्वारा शरीर
शुद्धिहेतुर्यज्ञादिरिवांतःकरणस्य तथा च तद्द्वारमपवर्गस्य बालानां चिकित्सितं । पवित्रं सर्ववि २२७

यानामधिविधेयप्रकाशनइति। इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणां। इयं सामोक्षमाणानामजि
ह्माराजपद्धतिः। अत्रातीतविपर्यासः केवलामनुपश्यतीति च वाक्यपदीयं संगच्छते। एवं च विजातीयज्ञा
नएवशास्त्रस्योपयोगइतिनत्वणत्वादिवद्व्यभिचारः। यत्त्वलौकिकप्रकृतिप्रत्ययकल्पनेति। तन्नापञ्चको
शादिवदस्यापिसदसद्विलक्षणापाएवदिक्‌ दर्शनमात्रेणोपपादयिष्यमाणत्वादितिदिक्। एवंरे
खागवयन्यायेनापिशास्त्रमुपायइत्यपव्याकृतः॥ ६१॥ ननुवर्णानांस्फोटात्मकत्वेकत्वगत्वादिकंतन्निष्ठंव्यं
जकवायुनिष्ठंवानाद्यः। तस्यनित्यत्वेनककारउत्पन्नइतिनस्यात्। अन्त्येतुगतःककारइतिप्रत्ययो
नस्यात्। कत्वस्यककाररूपनाममात्रव्याप्तेश्च। अत्रत्वेत्यमत्वंकादिप्रतीतीनांस्यादित्यतआह।
कल्पितानामुपाधित्वंस्वीकृतंहिपरैरपि। स्वरदैर्घ्याद्यपिध्वन्येवर्णेभ्योन्यस्यमन्यतो। कुत्रस्वीकृतंतत
त्राह। स्वरत्वादि। उदात्तत्वादिकंध्वनिनिष्ठमितिस्वीकारादितिभावः। एवंदीर्घत्वादिकमपि। आदिना
ह्रस्वत्वादिकमपिगृह्यते। अयंतेषामभिप्रायः। गकारादयोवर्णास्तावदेकेकाएव। मेहृत्सूत्रमनुभू

यमानादवुतानुभूयमानस्य सायमितिप्रत्यभिज्ञानात्- न च गत्वावछिन्नप्रतियोगिताकभेदाभावस्य
२२८ द्विषयः। व्यक्तातिरिक्तगत्वानंगीकारात्- अयं गकार इति चेदं रूपमिति विरुद्धमुपपद्यते। न च गत्ववानाका
र इत्यनयोरविशिष्टापत्तिः। सहप्रयोगश्च न स्यादिति शंक्यं प्रतीतौ गत्वस्यापि भानाद्विशेषसंभवात्- स
हप्रयोगस्यापि घटत्ववान् घट इतिवदुपपत्तेः। भिन्नेषु घटादिषु घटत्वावछिन्नप्रतियोगिताकभेदाभा
वसत्त्वात् सायमिति प्रतीत्यापत्त्या व्यक्तिभेदस्यैव तत्र विषयत्वावश्यकत्वाच। प्रत्यभिज्ञाया व्यक्तिवि
षयत्वे वाधकाभावाच्च- न च गकार उत्पन्न इति प्रतीतिरेव बाधिका- तस्या व्यंजकध्वनिनिष्ठोत्पत्त्यादेः
परंपरासंबंधेन वर्णनिष्ठत्वविषयत्वेनाप्युपपत्तेरतिरिक्तवर्णसाधकत्वात्- परंपरया वर्णनिष्ठत्वाभ्युप
गमाद्ध्वनन्यमतं साक्षात्संबंधांशे भ्रम इत्येव शिष्यते- तदपि सायमित्यत्र व्यक्तभेदांशे तवभ्रमत्ववत्तु
ल्यं। परंतु ममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पनागौरवापत्तिर्नेति लाघवमतिरिच्यते- तव तु तत्स्या
पितिमहदनिष्टं- किंच प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेर्न वर्णेषु ग्रहणामानुभविकी। अत एव २२८

र्णो मुच्चारयतीति प्रत्ययो नतूत्पादयतीति प्रत्ययो व्यवहाराद्वा उच्चारितत्वं च ताल्वोष्ठसंयोगादिजन्या
भिव्यक्तिविशिष्टत्वं तस्यैवेदानींतनतास्वरूपापादा तथा च प्रागनुभूतेनेदानींतनानुभूतस्याभेदसिद्धेः
तावत्कालं स्थिरत्वेनैकः प्रघामाशयिष्यतीतिन्यायेन नित्यत्वे वा नन्वेवं स्त्रीप्रभवोयं शुकप्रभवोयमि
ति प्रतीतिस्तत्र कथं वर्णा। स्त्रीशुकाद्यनुमानं च न स्यात् न चैवं जातेस्तद्वायुनिष्ठत्वं तदग्रहेपि वजात्यवोधात्।
नापि ध्वनिनिष्ठत्वं तत्र तस्मिन्मानाभावात् तदुत्पादकाशेषाद्यभावाच्च किंच सेयं गुर्जरीसेयं दीपकलिके
त्यादावपि नाशानस्यादिति चेन्न स्त्रीशुकादिजन्यतावच्छेदकताल्वोष्ठसंयोगे तदभिघातजवायौ वा
विद्यमानत्वेन जात्यं वर्णाभ्यारोप्यत इत्युपगमात् अत एव तारत्वादिरूपविरुद्धधर्माध्यासाद्भेद इति
निरस्तं मन्दत्वाच्चाग्रहे हि तन्निष्ठजात्याद्यग्रहः पिन यस्य धर्मो गृह्यते तेन तदपीति नियमादिति वाच्यं व
हिरिन्द्रियेषु व्यभिचारेण नियमाभावात् वस्तुतः प्रमायाः स्पर्शनस्पर्शायोग्यरूपस्पर्शिमात्रस्य रसनादेश्च
रसादिमात्रस्याग्राहकतया नैयायिकैः स्वीकारात् अस्तु वा स्त्रीशुकादिव्यंग्यत्वतारत्वादि श्ववर्णानि

षेणातिविशेषः।नचैतेषांकश्चिद्विरोधः।यापरांमेरोगाकःसएवेदानींरुष्टेनोप्यतइतिन्योपंतारोम
याश्रुतःसएवेदानींमेदइतिचप्रतीतेः।गुर्जरीदीपादिस्थलेपिमानांतरेणनाशसिद्धौसायमित्यस्यभ्र
मत्वात्अन्यथातत्रापीषएवनाशाद्यभावः।नचैवंवायुतात्वोष्णसंयोगादेर्गत्वंकार्यतावच्छेदकमेयस्य
तत्वत्यत्वतंत्वयावाच्यं।तथावंगोरखमितिवाच्यं।प्रत्यक्षत्वावच्छिन्नविषयितयागत्वस्येवकार्यतावच्छे
दकत्वात्-नन्वेवंघटोपिनित्यएवाकपालसंयोगादिव्यंजकंभविष्यतीतिचेन्न।प्रागसत्वेसतिसत्वरू
पायाउत्पत्तेस्तत्रग्रहीतायाविनाबाधकंत्यागायोगात्-अत्रतद्ग्रहविपरीतग्रहयोःसत्वेनतदयोगात्
।सत्कार्यवादाभ्युपगमेत्विष्टापत्तेश्च।नचगकारादेर्विनाव्यंजकमनुभवप्रकारस्यघटवत्संदेहापत्तिः
।दोषाद्यभावादुपपत्तेः।अन्यथोत्पन्नत्वादिसंदेहापिकिंनस्यात्-एवंचवीतरंगादिन्यायेनानेकवरणा
कल्पनायांगौरवमपास्तं।तस्मान्नित्याएववर्णाः।तस्माद्यथागकारादिप्रतीतिस्तथास्फोटप्रतीतिरपि
त्वादिरूपेणोपपत्तेतिनोक्तशंकेतिभावइतिसुधीभिर्ध्येयं।७०।इतिव्यक्तिस्फोटनिरूपणं॥ वाप २२९

वोक्तयुक्त्या जातिस्फोटमाह ॥६८॥ कृत्स्ने व्यक्तित्वे जातेर्लाघवमीक्षतां ॥ औपाधिको वा भेदोस्तु वर्णानां
तारमन्द्रवत् । अयमभिप्रायः । गकारादिव्यक्तिपृथक्त्वावदवश्याभ्युपेतव्याः । न चोक्तरीतिः साध्वी तथा
सति सोयं गकार इति वैधामयाहकारः श्रुत इति सोयं गकार इत्यापत्तिः । एकस्मिन्वारद्वयपदार्थस्य स
कलवर्णरूपत्वात् । गकारोयं नकार इत्यापत्तेश्च । किंच स्फोटे गत्वाद्यतिरिक्तमभ्युपेयं न वा । आद्ये
तदेव गकारोस्तु । वर्णातिरिक्तगत्वाभावस्य वर्णानित्यतावादे शंकरमेव त्वादृशमतिभिः सिद्धांतित
त्वात् । तथा चातिरिक्तस्फोटकल्पनमेव गौरवं । वर्णानामेव वाचकत्वोपपत्तौ तन्मानाभावाश्च ।
अंत्ये गकारादिप्रतीतिविरोधः । वायुसंयोगादिवृत्तिवैजात्यमेव न तु तद्व्यंजकतया प्रतीयत इति चेन्न । प्र
तीतेर्विनाबाधकं भ्रमत्वायोगात् । अस्तु वा वायुसंयोगस्यैव गकारोपि । न स्यात्तीव्रत्वदोष इति चे
न्न । तद्गतधर्मवैदेवोपपत्तेरितिरिक्तगतमतिरिक्तस्फोटकल्पनया । तस्मात्संत्येव वर्णाः । तथा च यथा
शक्त्या जातिरेव न तथाऽन्यत्रापि । अन्यथा वक्ष्यते नो वर्णानां वाचकत्वे गौरवं स्यात् । वस्तु बद्धकवशास्त्र

त्येकं वाचकत्वस्य चास्वीकारात् । इदं घटपदमिति प्रतीत्या घटपदज्ञानत्वेन कारणत्वे कारणतावच्छेदककोटिप्र
२३० 230 विष्टतया चतातिविशेषस्यावश्यकत्वात् । न च वर्णानुपूर्व्येव प्रतीतिकारणत्वयोर्निर्वाहः । घटत्वादेरपि संयोग
विशेषविशिष्टस्य देवान्यथासिद्ध्यापत्तेः । तस्मात्साजातिरेव शक्तातात्पर्यतदवच्छेदिकावति । ननु सत्त्वस
त्त्वादौ जातौ सत्त्वाविशेषादर्थबोधभेदो न स्यादित्यत आह औपाधिकीवेति । वातेर्थ उपाधिरानुपूर्वी ।
भेदः कारणीभूतज्ञानस्य । उपाधिप्रयुक्तज्ञानवैलक्षण्यं पदृष्टान्तमाह वर्णानामित्यादिना । आनुपूर्वीविशेष
एव जातिविशेषाभिव्यंजकः । आकारविशेषइव घटत्वादेस्तथा च नोक्तदोष इति भावः ॥७१॥ ननु जातेश्च
सकं वर्णेष्वपि सत्त्वात्तत्त्वे कादर्थबोधापत्तिस्तु — वेति प्रत्येकवर्णा एव वाचकाः किं न स्युरित्यत आ
ह ॥ अनेकव्यक्त्यभिव्यंग्या जातिः स्फोट इति स्मृता । कश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ॥ अ
येभावः । त्रिविधजातिस्फोटेषु वर्णापेक्षया घटप्पयं दोषस्तथापि पदवाक्यपक्षेनायं वर्णेषु तस्याव्यासज्यवृ
त्तित्वात् । तत्रापि पूर्ववत्पदार्थवाक्यार्थयोर्बोधकपदस्फोटो वाचकत्वेन स्वीक्रियते । तथा चानेकाभिव्य २३०

क्तिभिर्वर्णैर्व्यभिरभिव्यंग्या जातिः स्फोट इति स्मृताऽयोगार्थतया । एतेन स्फोटस्य सदातनत्वात्सर्वपदार्थवि
धापत्तिरित्यपास्तं । कैश्चित्तु व्यक्तय एव ध्वनय इत्यभ्युपेयत इति समुदायार्थः । उक्तं हि काव्यप्रकाशे । बुधै
वैयाकरणैः प्रधानीभूतस्फोटव्यंग्यव्यंजकशब्दस्य ध्वनिरिति व्यवहारः कृत इति । ७२ ननु कासा जाति
स्तत्राह ॥ सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ । सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः । प्रति
भावं प्रतिपदार्थं एतच्च संबंधिभेदात्सत्यैव विद्यमाना गवादिषु जातिरित्युच्यते तस्यां सर्वे शब्दा व्य
वस्थिताः । तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते । सा नित्या सा महानात्मा तामाहुस्त्वतलादय इ
ति वाक्यपदीये । नित्यं द्रव्यमिति प्रतीकमादायसत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थः
ब्रह्मराशिरित्यादायत्र ब्रह्मतत्त्वमेव शब्दस्वरूपतया भातीति कैयटेव स्पष्टं एवं च वाच्यवाचकं च ब्रह्मै
वेति भावः ॥ ७३ ॥ ननु प्रकृता जातिरेव नास्ति पदं पमित्याद्यनुगतबुद्धेर्वर्णानुपूर्व्यैवोपपत्तेः । तस्मा
अपि नानात्वेनुपरंपरया वर्णगतजातिर्वा नियामिकास्तु न च घटाद्यपि न सिद्ध्येदिति शंकायां इष्टापत्तेः

।मृदस्यावस्थाविशेषत्वात्कस्य· अनन्तरवाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रूयते: श्रुत्यादित्वं
२३१ चैतत्तदनन्यत्वमारंभणशब्दादिभ्यः।परवंचेत्यादिना ऋषिपुंगवेन भगवता व्यासेन सूत्रत एवाकृतिरि
231 त्यादाय ब्रह्मदर्शनेंगत्वादिजातेरप्यसत्वादनित्यत्वं आत्मैवेदं सर्वमिति श्रुतिवचनादि केयटः।शा
स्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते।समारंभस्तु भावानामनादिब्रह्मशाश्वतमिति वाक्यपदीये
पि·तदेतन्मनसि निधायाह।।इत्यनिष्कृष्यमाणाय छद्मतत्त्वे निरंजने।ब्रह्मैवेत्सहारं प्राकुस्तस्मै प्र
णात्मने नमः।।।।नामरूपे व्याकरवाणीति श्रुतिसिद्धद्वयीसृष्टिः।तत्र रूपस्यैव नाम्नोपि त
देवत्वात्।जन्ममरणादिकं तद्वत्स्वपं चश्व·तत्राविद्याकल्पितं इति वेदांततत्त्वमस्माकमपीष्टमेव·उक्तं
हि वाक्यपदीये·अजन्मनि तथा नित्ये पौर्वापर्यविवर्जिते।तत्वे जन्मादिरूपत्वं विरुद्धमुपलभ्यत इति
।तस्मादविद्यादशायामुक्तरीत्या जातिरपस्फोटः।निष्कर्षे तु ब्रह्मैव स्फोट इति भावः।परं त्वविद्याद
शायामपि वर्णानां वाचकत्वमभ्युपेत्य स्फोटस्वेउनमयुक्तमिति तु ध्येयं।ब्रह्मैवत्सनेनात्रापं पुरुषः २३१